# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

**कक्षा-तत्त्वाचार्य(SEM-1)** **प्रश्नपत्रम् – 1** गुणाः –70

विषयः – अनिवार्यम् समयः-11:30 तः 2:30 पर्यन्तम्

दिनाङ्कः –09/10/2019 सन्दर्भग्रन्थः – भारतीयसंशोधनपद्धतिः पाठसमीक्षाविज्ञानञ्च

---

| **प्र. क्र.** | **प्रथमान्वितिः (Unit 1)** | गुणाः |
|---|---|---|
| **प्रश्न १** | **कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** | ५ |
| १ | अनुसन्धानस्य स्वरूपं स्वशब्दैः प्रतिपादनीयम्। | |
| २ | कस्यचिद् एकस्य पाठस्य समीक्षणं कार्यम्। | |
| **प्रश्न २** | **कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** | १० |
| १ | अनुसन्धानस्य कानि कानि उद्देश्यानि सन्ति, तेषाम् उपयोगः कथं करणीयः, येन संस्कृतक्षेत्रस्य अनुसन्धानकार्यं समाजाय उपयोगि भवेत्। | |
| २ | शोधप्रक्रियायाः उपयोगः संस्कृत-वाङ्मये कियन्मात्रायां भवति, इति स्वानुभवैः लेखनीयम्। | |
| | **द्वितीयान्वितिः (Unit 2)** | |
| **प्रश्न ३** | **कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** | ५ |
| १ | कमपि विषयमाश्रित्य एकं प्रगति-प्रतिवेदनं सज्जीकर्त्तव्यम् । | |
| २ | पाठ-समीक्षणस्य सोपानानि समस्याश्च लेखनीयाः । | |
| **प्रश्न ४** | **कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** | १० |
| १ | संस्कृतक्षेत्रे काः काः शोधसमस्याः अनुभूयन्ते भवद्भिः, इति स्वशब्दैः लेखनीयम्। | |
| २ | शोधस्य कृते समस्यानां चयनं कथं कर्त्तव्यम् इति सोदाहरणं लिखन्तु। | |

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** ५

१ शोधविषयस्य निर्वाचनं कथं करणीयम्।

२ कलादृष्ट्या अनुसन्धानस्य प्रकाराः निर्णेतव्याः।

**प्रश्न ६ कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ शोधप्रकाराः सोदाहरणं प्रस्तोतव्याः।

२ रामायणस्य समीक्षणं वैज्ञानिकदृष्ट्या कर्त्तव्यम्।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** ५

१ समीक्षा-शब्दस्य अर्थं विलिख्य पाठसमीक्षापद्धतिः प्रस्तोतव्या।

२ मूलपाठनिर्णयपद्धतिः सोदाहरणं प्रस्तोतव्या।

**प्रश्न ८ कस्यचिदेकस्य प्रश्नस्य उत्तरं देयम्।** १०

१ सन्दर्भग्रन्थानां संकलनस्य आधारभूतानि तत्त्वानि विलिख्य एका सन्दर्भग्रन्थसूची सज्जीकरणीया।

२ सामग्रीसंकलनस्य के के उपायाः सन्ति , इति सोदाहरणं लेखनीयम्।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ साक्षात्कारः शोधकार्ये सहायको भवितुं शक्नोति / न शक्नोति?

२ अनुसन्धान-शब्दे कः प्रत्ययः?

३ शोध-कार्ये अन्तर्जालस्य आवश्यकता विद्यते / न विद्यते?

४ अनुसन्धान-शब्दे को धातुः?

५ इतिहाससम्बन्धी शोधः कीदृशः शोध: कथ्यते?

६ शोधप्राग्रूपनिर्माणस्य आवश्यकता विद्यते / न विद्यते?

७ समीक्षा-शब्दे को धातुः?

८ समीक्षा-शब्दे कः प्रत्ययः?

९ सम्यक् ईक्षणं किं भवति?

१० शोध-शब्दे को धातुः?

११ प्रविधि-शब्दे कः प्रत्ययः?

१२ अनुसन्धितविषयस्य पुनः अनुसन्धानं भवितुं शक्नोति / न शक्नोति?

१३ शोधेन बौद्धिकविकासो भवति / न भवति?

१४ शोधः पूर्वाग्रहाणां निवारणे सहायको भवति / न भवति?

१५ शोधः सामाजिकविकासे सहायको भवति / न भवति?